दिनाङ्क :-05.12.2025

प्रात: - 06:55

## रूसराष्ट्रपतियात्रा

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य नवदिल्ल्यां त्रयोविंशतितमे भारत-रशिया-वार्षिक-शिखरसम्मेलने रशियादेशस्य राष्ट्रपतिना व्लादिमीर्-पुटिन्-वर्येण सह वार्तालापं करिष्यति। द्वावपि नेतारौ द्विपक्षीयसम्बन्धेषु प्रगतेः समीक्षां करिष्यतः, परस्परहितस्य क्षेत्रीय-वैश्विक-विषयेषु च चर्चां करिष्यतः। वार्तायाः अनन्तरं व्यापारः, अर्थव्यवस्था, स्वास्थ्यसेवा, शिक्षा, संस्कृतिः, माध्यमः च इत्यादिभिः क्षेत्रैः सह सम्बद्धानि अनेकानि सन्धिपत्राणि हस्ताक्षरितानि भविष्यन्ति इत्यपेक्षा वर्तते । राष्ट्रपतिः व्लादिमिर्-पुटिन्-वर्यः भारतयात्रार्थं गतसायं नवदिल्लीमागतः । प्रधानमन्त्रिणा श्रीमोदीना विमानस्थानके तस्य भव्यं हार्दिकं स्वागतं कृतम् ।

अद्य प्रातः राष्ट्रपतिभवने पुटिन् वर्यस्य औपचारिकं स्वागतं भविष्यति । श्रीपुटिन् राजघाट इत्यत्र महात्मागान्धिनः समाधौ पुष्पाञ्जलिं समर्प्य श्रद्धांजलिम् अर्पयिष्यति । सायं राष्ट्रपतिः द्रौपदी मुर्मूः श्रीपुटिन्-वर्यस्य सम्मानार्थं रात्रिभोजनस्य आयोजनं करिष्यति । अवधेयं यत् भारतम् रशियादेशः च स्व-रणनैतिक-सहयोगस्य पञ्चविंशतितम-वार्षिकोत्सवम् आचरति ।

## भारत-रशिया-रक्षा

रक्षामन्त्री राजनाथसिंहः रशिया-देशं भारतस्य समय-परीक्षित-विशेष-रणनैतिक-सहयोगीति वर्णयन् उक्तवान्, यद् वैश्विक-अनिश्चिततायाः मध्येऽपि भारत-रशिया-सम्बन्धः सुदृढः वर्तते । श्रीराजनाथसिंहः नवदिल्लीनगरे स्वस्य रशिया-समकक्षेन एण्ड्रेई बेलोसोव् इत्यनेन सह सैन्य-सैन्य-तन्त्रज्ञान-सहकार्य-विषये द्वाविंशति-तमे भारत-रशिया-अन्तर-सर्वकारीय-आयोगस्य मन्त्रि-समागमस्य सह-अध्यक्षत्वेन स्वस्य उद्घाटनभाषणे एतत् अवदत् । अस्मिन् अवसरे वदन् रशिया-देशस्य रक्षामन्त्री एण्ड्रेई बेलोसोवः अवदत् यत्, कालेन सह, परस्परं भारत-रशिया-सम्बन्धाः सम्मानाधारिताः सुदृढाः च अभवन् ।

## मत्स्यभारत-रूसः

त्रयोविंशतितमं भारत-रशिया-वार्षिक-शिखरसम्मेलनम् अन्तरा मत्स्यपालन-पशुपालन-दुग्ध-पालन-मन्त्री राजीव-रञ्जनसिंहः ह्यः नवदिल्ली-नगरे रशिया-कृषि-मन्त्री ओक्साना-लुट्-इत्यनया सह द्विपक्षीय-संगोष्ठी कृता । मत्स्यपालन, पशुपालन, दुग्धपालन-मन्त्रालयेन सूचितं यत् संगोष्ठ्यां द्वयोः पक्षयोः मत्स्यपालन-पशु-दुग्ध-उत्पादानाम् परस्पर-व्यापारस्य, विपण्य-प्रवेश-समस्यानां समाधानस्य, निर्यातस्य कृते निर्माण-सूचीनां शीघ्र-निरीक्षणस्य च चर्चा अभवत् ।

## गुजरात - अमित शाह

केन्द्रीय गृहमन्त्री अमित शाहः अद्यारभ्य गुजरातस्य त्रिदिवसीययात्रायां भविष्यति । अस्मिन्नवधौ श्री-शाहः अहमदाबाद-गान्धीनगर-वाव-थराद-बनास्कन्थादिषु अनेकेषु कार्यक्रमेषु भागं गृहीष्यति । अस्मिन्नवधौ श्री शाहः अहमदाबाद-नगर-निगमस्य अनेक-प्रमुख-आधारभूत-संरचनानि सार्वजनिक-सुविधा-परियोजनानि च उद्घाटयिष्यति ।

## डीजीसीए- इण्डिगो व्यवधान

गतसप्ताहे इन्डिगो एयरलाइन्स् विमान-उड्डयन-व्यवधानमुद्दिश्य नागरिक-विमाननमन्त्रिणः के.राममोहन-नायडुः इत्यस्य अध्यक्षतायां एका सभा आयोजिता आसीत् । सभायां मन्त्रालयस्य वरिष्ठाधिकारिणः, इन्डिगो इत्यस्य शीर्षनेतृत्वं च उपस्थिताः आसन् । अद्यत्वे इण्डिगो विमानसेवायाः प्रतिदिनं द्विशतं यावत् विमानानां सेवा-व्यवधानं भवति,यद्धि सामान्यापेक्षया बहु अधिकम् अस्ति ।

डीजीसीए इत्यनेन उक्तं यत्, इण्डिगो संस्थया सूचितं यत् एतत् व्यवधानम्, आगामिषु कतिपयदिनेषु निरन्तरं भवितुं शक्नोति परन्तु विमान-सञ्चालनस्य स्थिरीकरणाय कार्यं करिष्यते। इण्डिगो संस्थया सूचितं वर्तते यत्, यात्रिकाणां असुविधां न्यूनीकर्तुं दिसम्बर् अष्टम-दिनांकात् न्यूनानि विमानयानानि चालयिष्यति।

**<u>लंका-सागर बन्धु ::</u>**

भारतेन ऑपरेशन सागर बन्धु इत्यस्यान्तर्गतं, चक्रवात-प्रभावितक्षेत्रे आवश्यकसंपर्कं पुनः स्थापयितुं श्रीलङ्कादेशस्य कोलम्बोनगरं प्रति पञ्चषष्टि-टन-भारमितं बेली-ब्रिज् इति सेतोः परिवहनं कृतम्। अन्तर्जालीय-माध्यम-सन्देशे रक्षामन्त्रालयेन सूचितं यत् Mi-17 V5 हेलिकॉप्टर इत्यस्य माध्यमेन षट्-टन्-मितं आपदुद्धार-सामग्री वितरिता, चतुर्विंशतिः जनाः रक्षिताः।

**<u>ऋतुविभागः</u>**

भारतीय-ऋतुविज्ञानविभागेन, पञ्जाब, हरियाणा, पूर्वी-राजस्थान, झारखण्ड इत्येतेषु राज्येषु आगामि-दिनद्वयं यावत् तीव्रशीत-तरङ्गस्य पूर्वानुमानं कृतम् अस्ति। विभागानुसारम्, शनिवासरपर्यन्तं हिमाचलप्रदेश, ओडिशा, ईशानपूर्वराज्येषु च सघनहिमवातस्य स्थितिः प्रचलति इति संभावना वर्तते। विभागेन सूचितं यत्, अद्य तमिलनाडु, पुडुचेरी, कराईकाल इत्यत्र विद्युत्सहितेन गर्जनेन सह प्रचण्डवृष्टिः, भविष्यति।

**<u>शतरंजः</u>**

भारतीयः ग्राण्डमास्टर अर्जुन-एरिगैसी इत्यनेन सर्वभारतीय-अन्तिम-क्रीडायां पूर्वविश्वविजेतृ-विश्वनाथन-आनन्दं पराजित्य ऐषमः जेरुसलेम-मास्टर्स् इत्युपाधिं प्राप्तवान्। अर्जुनः बुधवासरे

स्वस्य प्रारम्भिक-द्रुत-क्रीडाणां सममूल्य-अर्जनानन्तरं ब्लिट्ज् टाई-ब्रेक्-माध्यमेन उपाधिं प्राप्तवान् ।